दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-38 | 1 | दिसम्बर 8, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लसप्तमी तिथिः मार्गशीर्ष २३ प्रविष्टांशः मङ्गलमयः भवेत्

2 HPCM: विद्यालयस्य पाठ्यक्रमे समाविष्टा भविष्यति स्वास्थ्यशिक्षा मुख्यमंत्री सुक्खुः



3 क्रीड़ावार्ताः-हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धाओमानदेशस्य मस्कटेतिनगरे समारभते।



3 4हिमाचलाय चत्वारः केन्द्रीयविद्यालयाः, सिराजस्य थुनागः, जसवां प्रागपुरस्य रीढ़ी कुठेड़ा



## सर्वकारः अशेषे हि देशे सम्पर्क वर्धयितुं प्रतिबद्धः अस्ति-प्रधानमंत्री



प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् सर्वकारः अशेषे हि देशे सम्पर्क वर्धयितुं प्रतिबद्धः अस्ति । सामाजिक- अंतर्जालीय पटले सः अवोचत् यत् दिल्ली-मेट्रो इत्यस्य चतुर्थ-चरणस्य अन्तर्गतस्य रिठाला-कुण्डली-मार्गस्य अनुमोदनेन दिल्ली-हरियाणा-नगरयोः यात्रा सुकरं भविष्यति इति। मन्त्रिमण्डलेन दिल्ली-मेट्रो-चतुर्थ-चरण-परियोजनायाः अन्तर्गतं मार्गस्य अनुमोदनं कृतम्, यत् आगामिषु चतुर्षु वर्षेषु पूर्णतां यास्यति। पूर्वं मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् केन्द्रीयमन्त्रिणा अश्विनी वैष्णवेण परह्यः प्रोक्तं यत् नगरीययात्रिकाणां कृते मेट्रो-यानस्य द्रुतः विस्तारः आवश्यकः अस्ति यतः एतत् यात्रायाः सुविधाजनकं साधनम् अस्ति इति। सम्पूर्ण देशे पञ्चाशीति नूतनानि केन्द्रीय विद्यालयानि (के. वी.) उद्घाटयितुं मन्त्रिमण्डलस्य निर्णयस्य प्रशंसां कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् विद्यालयी-शिक्षां यथासंभवं सुलभं कर्तुं सर्वकारेण अयं महत्वपूर्णः निर्णयो विहितः। सः प्रतिपादितवान् यत् यद्यपि अनेन कार्येण बहुसङ्ख्यकाः छात्राः उपकृताः भविष्यन्ति तथापि अनेन नैके वृत्यवसराः अपि कल्प्यन्ते इति।

## ओडिसाराज्ये राष्ट्रपतिः रेल्-परियोजनानां सहितं विभिन्नानां परियोजनानां शिलान्यासं विहितवती



राष्ट्रपतिः द्रौपदी मुर्मु उत्तर-ओडिशा-राज्ये केन्दुझार्-मयूर्भज्-जनपदौ योजयन्तः चतुर्नवत्यधिकद्विशतोत्तर षट्सहस्र कोटि-रूप्यकाणां त्रयाणां रेल्-परियोजनानां सहितं विभिन्नानां परियोजनानां शिलान्यासं विहितवती । तया जनजातीय-अनुसन्धान-विकास-केन्द्रस्य, चतुर्दशमन्दिराणां पञ्चविंशतिः कोटिरूप्यकाणां शताधिक-शय्यायुक्तस्य चिकित्सालयस्य स्वगृहमण्डलस्य मयूर्भज्-नगरस्य रैरङ्गपुर्-नगरे दण्डबोस्-विमानपत्तनस्य उन्नतिकरणस्य विकास-परियोजनायाः अपि आरम्भः अकारि। बङ्गीपोसी-तः गोरुमहिसानी-पर्यन्तं, बादामपहाड्-तः केन्दूझारगढपर्यन्तं, बुडमारा-तः चाकुलिया-पर्यन्तं च नूतनाः रेलमार्गाः सन्ति। नूतनाः रेल्-मार्गाः सम्पर्क अविरतं वर्धयेयुः, आर्थिकवृद्धिं प्रोत्साहयेयुः, अस्मिन् प्रदेशे जीवनस्तरं च वर्धयेयुः इति अपेक्षा अस्ति। प्रधानमन्त्री नरेन्द्र मोदी वर्यस्य अध्यक्षतायां आर्थिककार्य-मन्त्रिसभा-समित्या सद्यः एव रेल-परियोजनानां अनुमोदनं कृतम्। ओडिशा- राज्यस्य मुख्यमन्त्री मोहनचरणमाझी, केन्द्रीय रेल-मन्त्री अश्विनी वैष्णव्, केन्द्रीय-जनजातीय- कार्य-मन्त्री जूयल् ओरम् इत्येते अस्मिन् शिलान्यास-समारोहे उपस्थिताः आसन्। मङ्गलवासरतः स्वगृहस्य ओडिशा-राज्यस्य पञ्चदिवसीया यात्रायां स्थिता राष्ट्रपतिः गतदिने अपराह्णे देहलीनगरं प्रत्यागतवती ।

## नवदशदिनाङ्के प्रशासन्-गाव्-की-ओर, इति राष्ट्रव्यापी-अभियानस्य आरम्भः भविष्यति



सुशासन सप्ताहस्य कालावधौ दिसेम्बर्-मासस्य नवदशदिनाङ्के प्रशासन्-गाव्-की-ओर, इति राष्ट्रव्यापी-अभियानस्य आरम्भः भविष्यति। कार्यक्रमः दिसेम्बर्-मासस्य चतुर्विंशतिः दिनाङ्कपर्यन्तं भविष्यति। यस्मिन् देशस्य सर्वेषु मण्डलेषु कार्यक्रमाः सम्मिलिताः भविष्यन्ति। अस्मिन् अभियाने सप्तशतोप्यधिकाः मण्डल-समाहर्तारः भागं ग्रहीष्यन्ति। अधिकारिणः उपमण्डलानां पञ्चायत्-समिति-मुख्यालयानां च भ्रमणं करिष्यन्ति। एतत् तृतीयं वारम् अस्ति यत् सर्वकारः स्वातमंडलस्तरे जनसमाह्वानानां निवारणार्थं सेवा-प्रदाने च परिष्काराय राष्ट्रियम् अभियानम् आयोजयिष्यति। प्रशासन् गाव् की ओर अभियान इत्यनेन सुशासनार्थं राष्ट्रिय-आन्दोलनस्य निर्माणं भविष्यति यत् भावी समाजं प्रेरयिष्यति।

## भारतं स्वनागरिकान् सिरिया-देशं प्रति यात्रां न कर्तुम् उपादिशत्

भारतं स्वनागरिकान् पश्चिम-एशियादेशस्य विद्यमानां स्थितिं दृष्ट्वा, अग्रिमसूचनापर्यन्तं सिरिया-देशं प्रति यात्रां न कर्तुम् उपादिशत्। एकस्मिन् परामर्शे विदेशमन्त्रालयेन वर्तमानकाले सिरियादेशे स्थितेभ्यः भारतीयान् अद्यतनविवरणार्थं दमास्कस्-नगरस्य भारतीय दूतावासेन सह सम्पर्कं स्थापयितुं सूचितम्। दूतावासस्य आपत्कालीन-सहायिका-सङ्ख्या नव षट् त्रीणि नव नव त्रीणि त्रीणि अष्ट पञ्च नव सप्त त्रीणि अस्ति तथा च ईमेल-ऐ. डि. हाक् damascusi@mea.gov.in अस्ति। ये निर्गन्तुं शक्नुवन्ति तेभ्यः प्रारम्भिकेषु उपलभ्यमानेषु वाणिज्यविमानयानैः निर्गन्तुं सूचितम् अस्ति। अन्ये स्वसुरक्षायाः विषये अत्यन्तं सावधानम् आचरन्तु, स्वचालनं न्यूनातिन्यूनं परिमितं कुर्युः इति सर्वे प्रार्थिताः सन्ति।

## प्रमुखैः कृषि-अर्थशास्त्रज्ञैः च सह द्वितीय-आयव्ययपूर्व-परामर्शस्य आध्यक्षं आवहत्वित्तमन्त्री निर्मला सीतारामन्



वित्तमन्त्री निर्मला सीतारामन् नवदेहली-नगरे आगामि-केन्द्रीय-आयव्ययस्य विषये विविध-कृषक-सङ्घः प्रमुख कृषि अर्थशास्त्रज्ञैः च सह द्वितीय-आयव्ययपूर्व-परामर्शस्य आध्यक्षं आवहत् । सभायां वित्तराज्यमन्त्री पङ्कज् चौधरी वित्तसचिवः डी. ऐ. पी. ए. एम्. इत्यस्य सचिवः आर्थिककार्यविभागस्य सचिवः च उपस्थिताः आसन्।

## सुभाषितम्

त्यजेत् कुलार्थे पुरुषं
ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे
आत्मार्थे पृथिवीं त्यजेत्।।

अर्थात्- कुल की रक्षा के लिए एक मनुष्य का, ग्राम की रक्षा के लिए कुल का, देश की रक्षा के लिए ग्राम का और आत्मा की रक्षा के लिए पृथ्वी का त्याग कर देना चाहिए।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## अण्डर-१९ एशिया कप



अद्य दुबईनगरे पुरुषाणां अंडर 19 इति नवदश वर्षाभ्यन्तर-एशियाचषक-एकदिवसीय क्रिकेट्- क्रीडायाः निर्णायक द्वन्द्वे भारतं बाङ्गलादेशं सम्मुखी करिष्यति । क्रीडायाः आरम्भः भारतीय समयानुसारं सार्द्धदश-वादने भविष्यति। अवधेयं वर्तते यत् बाङ्गलादेशः त्रयोविंशत्यधिक द्विसहस्रतमे वर्षे अण्डर-19 इति एशियाचषक क्रीडायाः निर्णायकद्वन्द्वे यूएई-दलं पराजय्य गतवर्षस्य विजेता अस्ति ।

देवेन मनुष्याः पशवश्च निर्मिता। तदनन्तरं देवेन दृष्टं यद मनुष्यानाम् अपेक्षया पशवः बहवः सन्ति। तर्हि तेन किंचित् परिवर्तनं कृतम्। कतिचन पशूनां परिवर्तनं मनुष्येषु कृता। एतेन कारणेन तेषां बाह्याकृति तु मनुष्यान् सादृश्यं दृश्यते किन्तु अन्तःकरणेन ते पशवः इव।

डॉ. वर्षा प्रकाश टोणगांवकर

# JBT PROMOTION: जेबीटीतः टीजीटीपर्यन्तं पदोन्नतिषु

## दिव्यांगशिक्षकाः आरक्षणं प्राप्स्यन्ति, शिक्षाविभागेन परिपत्रं प्रसारितम्

हिमसंस्कृतवार्ताः - शिमला। दिव्याङ्गशिक्षकाणां कृते शिक्षाविभागे जेबीटीतः टीजीटीपदपर्यन्तं पदोन्नतिरूपेण आरक्षणं भविष्यति। राज्यसर्वकारस्य निर्देशानुसारं शिक्षाविभागेन अस्मिन् विषये प्रक्रिया आरब्धा अस्ति। अस्य विषये विभागेन पूर्वमेव आदेशाः निर्गताः सन्ति। शनिवासरे प्रारम्भिककशिक्षाविभागस्य निदेशकेन आशीषकोहली इत्यनेन सर्वेषां मण्डलानाम् उपनिदेशकानां समक्षं परिपत्रं प्रसारितम् अस्ति। पदोन्नतिसूचीनां निर्माणकाले विशेषसावधानी कर्तव्या इति उक्तम्।




### 9 दिसम्बरपर्यन्तं पात्रशिक्षकाणां सूचनां दातुं निर्देशाः

जेबीटीतः टीजीटी- कला- विज्ञान- गणित- (Arts, Medical and Non-Medical) पदेषु पदोन्नतिः भवितुम् अर्हति। विभागेन निर्गते परिपत्रे उक्तं यत् एषा सूचना विशेषदूतस्य अन्तर्गतं ९ दिसम्बर यावत् सर्वेषां योग्यशिक्षकाणां कृते प्राप्तव्या। मण्डलात् पदोन्नतिं कर्तुं निदेशालयं प्रति प्रेषितेषु प्रकरणेषु सर्वेषां योग्यानां नामानि समाविष्टुं शक्यन्ते। विभागः दिव्याङ्गवर्गस्य अन्तर्गतं जेबीटी इत्यस्य १८७ पदेषु बैचवारनियुक्तिः अपि कुर्वन् अस्ति।

### दिव्याङ्गवर्गतः १८७ पदेषु नियुक्तिः भविष्यति

राज्यस्य सर्वकारीयविद्यालयेषु जेबीटी-शिक्षकाणां अभावः शीघ्रमेव निराकृतः भविष्यति। राज्यसर्वकारः विद्यालयेषु दिव्याङ्गवर्गस्य अन्तर्गतं जेबीटीशिक्षकाणां १८७ पदानि पूरयितुं गच्छति। अस्य कृते परामर्शः १७ दिसम्बरतः १९ पर्यन्तं भविष्यति। अस्मिन् विषये एका अधिसूचना प्रालम्भिकशिक्षानिदेशकेन आशीष कोहली द्वारा निर्गता। सर्वेषां मण्डलानां प्रारम्भिकशिक्षा उपनिदेशकान् निर्धारितसमये परामर्शप्रक्रिया सम्पन्नं कर्तुं निर्देशः दत्तः अस्ति। विभागेन नियुक्त्यर्थं वर्गशः तालिका (रोस्टर) अपि प्रकाशितम् अस्ति। अस्मिन् एतानि पदस्थानानि अन्येभ्यः वर्गेभ्यः पूरितानि भविष्यन्ति यत्र दृष्टिबाधः, श्रवणशक्तिहीनः, बहुविकलाङ्गः च सन्ति।

# HPCM: विद्यालयस्य पाठ्यक्रमे समाविष्टा भविष्यति स्वास्थ्यशिक्षा



हिमसंस्कृतवार्ताः - शिमला । मुख्यमंत्री सुखविंदरसिंहसुक्खुः शिमलायां निक्षय-अभियानस्य अन्तर्गतम् आयोजिते कार्यक्रमे मुख्यातिथिरूपेण भागं गृहीतवान्। अस्मिन् अवसरे सः पोर्टेबल- एक्स-रे-यन्त्रेण यक्ष्मरोगस्य परीक्षणमपि कृतवान्। सः अस्य अभियानाय समर्पितं सचलयानं हरितध्वजं प्रदर्श्य प्रेषितवान्। मुख्यमन्त्री उक्तवान् यत् शतदिनानि यावत् प्रचलति एतद् अभियानम् हिमाचलप्रदेशं क्षयरोगमुक्तं कर्तुं प्रभावी सिद्धम् भविष्यति। क्षयरोगप्रकरणानाम् समये परिचयं, प्रभावी चिकित्सा, समुदायेषु जागरूकता च सुनिश्चित्य अस्य अभियानस्य उद्देश्यम् अस्ति। मुख्यमन्त्री उक्तवान् यत् एतद् अभियानम् राज्यस्य सर्वेषु मण्डलेषु चालितः भविष्यति, यस्य अन्तर्गतं दुर्बलवर्गेषु विशेषं ध्यानं दीयते। सः सर्वेभ्यः आह्वानं कृतवान् यत् ते स्वक्षेत्रेषु क्षयरोगविरोधीशिबिरे अभियाने सक्रियरूपेण भागं गृह्णन्तु, जनान् च क्षयरोगस्य लक्षणं ज्ञात्वा समये परीक्षणं कर्तुं प्रोत्साहयन्तु। सः विश्वासं प्रकटितवान् यत् निकटभविष्यत्काले हिमाचलप्रदेशः क्षयरोगमुक्तराज्यरूपेण उद्भवति। एतत् दृष्ट्वा राज्यसर्वकारेण केन्द्रसर्वकाराद् प्राप्तसाहाय्यस्य अतिरिक्तं मुख्यमन्त्री क्षयरोगनिवारणयोजनायाः अन्तर्गतं द्विकोटिरूप्यकाणि विनियोजितानि सन्ति। राज्यस्य १३ प्रतिशतं जनाः ६० वर्षाणाम् उपरि सन्ति, एतत् दृष्ट्वा वृद्धानां कृते शीघ्रं निदानं निवारणं च आवश्यकम् अस्ति। सः युवा सन्ततिः जागरूकाः भवेयुः, रोगनिवारणाय स्वस्थजीवनशैलीं स्वीकुर्वन्तु इति विषये बलं दत्तवान्।सः अवदत् यत् बालकाः अल्पवयसा एव जागरूकाः कर्तुं स्वास्थ्यशिक्षां विद्यालयस्य पाठ्यक्रमे समावेशयितुं सर्वकारः विचारयति। स्वास्थ्यक्षेत्रं प्राधान्यं दत्त्वा राज्यसर्वकारेण अस्मिन् क्षेत्रे विकासस्य दिशि अनेकानि पदानि कृतानि। चिकित्सालयेषु आपत्कालीनविभागानाम् उन्नयनं क्रियते, चिकित्सामहाविद्यालयानाम् आधुनिकचिकित्सासाधनानां निविदाः च निर्गताः एव सन्ति। मुख्यमन्त्री आश्वासनं दत्तवान् यत् एकवर्षेण अन्तः राज्यस्य जनानां कृते उन्नतनिदान- चिकित्सासुविधासु प्रवेशः सुनिश्चितः भविष्यति।

# विश्वबैङ्कतः हिमाचलप्रदेशस्य प्रशंसा १०४५ कोटिरूप्यकाणां परियोजनायाः समाप्तेः अनन्तरं उत्साहः वर्धितः, द्वितीयचरणस्य परियोजनायाः वितरणस्य सज्जता

हिमसंस्कृतवार्ताः- शिमला। विश्वबैङ्कद्वारा हिमाचलप्रदेशे सम्पन्नस्य उद्यानविकासपरियोजनायाः प्रारूपम् आदर्शप्रारूपरूपेण प्रचारयिष्यति। अन्येषु राज्येषु अन्येषु च देशेषु अस्याः परियोजनायाः माध्यमेन उद्यानपालकाः कथं लाभान्विताः भवन्ति इति कथयिष्यते। विश्वबैङ्कद्वारा १०४५ कोटिरूप्यकाणां एषा परियोजना २०१६ तमे वर्षे हिमाचलप्रदेशाय समर्पिता आसीत्, यस्य अवधिः सप्तवर्षीया आसीत्। परन्तु Covid कारणात् विलम्बः जातः यस्मात् कारणात् विश्वबैङ्केन तस्य विस्तारः दत्तः। अधुना एषा परियोजना सम्पन्ना, यस्मिन् विषये विश्वबैङ्कद्वारा हिमाचलस्य प्रशंसा कृता। शुक्रवासरे विश्वबैङ्कस्य कार्यदलस्य नेता बेकजोड़ शामशिवः अधिकारिभिः सह तस्य समीक्षां कृत्वा पत्रकारैः सह भाषितवान्। अस्मिन्नवसरे उद्यानविभागस्य सचिवः सी. पालरासु, परियोजनानिदेशकः सुदेशकुमारमोख्टा, एचपीएमसी इत्यस्य महाप्रबन्धकश्च सनीशर्मा अपि उपस्थिता अभवन्।बेकजोड़ शामशिव इत्यनेन उक्तं यत् विश्वबैङ्क इति हिमाचलाय अन्यां परियोजनां दातुम् इच्छति, यत् कृषि-उद्यान-पशुपालन-क्षेत्राणां संयोजनेन कार्यं करिष्यता। त्रयाणां क्षेत्राणां विषये ध्यानं भविष्यति। परन्तु राज्यसर्वकारः अद्यापि एतत् न सहमतः यतः सर्वकारः अपि अस्य विषये चर्चां कुर्वन् अस्ति। उद्यानविभागस्य सचिवः सी. पालरासुः परियोजनायाः अन्तर्गतं किं कार्यं कृतम् इति अवदत्। उद्यानपालकेभ्यः ३० लक्षं रोपणसामग्री उपलब्धा अस्ति, यस्मिन् सेबस्य अतिरिक्तं बेरः, चेरी, अक्षोटम्, बादामस्य च वनस्पतयः अपि सन्ति। उद्यानकार्यार्थं भूमिं सज्जीकर्तुं साहाय्यं कृतम्, मूलभूतसंरचना च प्रदत्ता। अस्मिन् कार्यालयभवनानां निर्माणस्य,



प्रायः ९० सहस्राणि कृषकाः अधिकारिणः च प्रशिक्षिताः, येषां प्रशिक्षणं न्यूजीलैण्ड, नेदरलैण्ड, बोस्निया, सर्बिया इत्यादीनां विशेषज्ञैः कृतम्। शिलारु- पालमपुरक्षेत्रयोः उत्कृष्टताकेन्द्रद्वयं निर्मितम्, तत्र ३० कृषक-उत्पादक-कम्पन्यः निर्मिताः सन्ति। एचपीएमसी इत्यस्य १३ परियोजनासु पञ्च सीए- भण्डाराः, पञ्च ग्रेडिंग- पैकिंग- गृहाणि, त्रीणि प्रसंस्करण-संस्थानानि च निर्मितानि सन्ति। त्रयः नूतनाः विपण्यः निर्मिताः, षट् पुरातनविपणीनाम् च उन्नयनं कृतवन्तः।

### पञ्चमासानाम् अनन्तरं प्रतिवेदनं आगमिष्यति

परियोजनानिदेशकः सुदेशकुमारमोख्टा उक्तवान् यत् विश्वबैङ्क इति अस्याः परियोजनायाः तुलनात्मकं प्रतिवेदनं सज्जीकरोति यत् पञ्चमासानां अनन्तरं आगमिष्यति। एषा परियोजना उद्यानक्षेत्रे आधारभूतसंरचनाविकासस्य उद्देश्येन दत्ता, यस्मिन् हिमाचलप्रदेशः सफलतां प्राप्तवान्।

# हिमपातः- रात्रौ हिमाचले वातावरणं परिवर्तते, त्रीणिदिनानि यावत् वर्षा- हिमपातस्य सम्भावना

हिमसंस्कृतवार्ताः- शिमला। पश्चिमविक्षोभस्य क्रियाकलापस्य कारणात् रात्रौ हिमाचलप्रदेशे वातावरणे परिवर्तनस्य सम्भावना वर्तते। ऋतुविज्ञानकेन्द्रशिमलायाः अनुसारं ७ दिसम्बरदिनांकस्य विलम्बेन रात्रौ आरभ्य अनेकेषु भागेषु वर्षा-हिमपातः ९ दिसम्बर-दिनाङ्कपर्यन्तं भविष्यति इति अपेक्षा अस्ति ऊना, हमीरपुरम्, बिलासपुरम्, कांगड़ा, मण्डी, शिमला, सोलनम्, सिरमौरः एतेषु मण्डलेषु ८ दिसम्बर दिनाङ्के गर्जनस्य पीतसचेतना निर्गता। १०, ११ दिसम्बर दिनाङ्कयोः भाखड़ाजलबन्धस्य (बिलासपुरस्य) बल्ह उपत्यकायाः (मण्डी) च जलाशयक्षेत्रस्य अनेकभागेषु प्रातः सायं च सघननीहारस्य सम्भावना वर्तते अपरपक्षे गत २४ होरासु राज्यस्य अधिकांशस्थानेषु न्यूनतमं तापमानं सामान्यतः २-३ डिग्री सेल्सियसपर्यन्तं न्यूनम् एव अभवत्। शिमलानगरे अपि न्यूनतमः तापमानं ८.४ डिग्री सेल्सियसतः ५.० डिग्री सेल्सियसपर्यन्तं न्यूनीकृतः अस्ति। आदिवसे शीतलवायुः प्रवहति इति कारणेन शीतलता वर्धिता अस्ति।



## KKSU Ramtek: विश्वविद्यालयस्य स्नातकोत्तरशिक्षा एवं शिक्षकमहाविद्यालयविभागे आयोजिता राष्ट्रियसंगोष्ठी



हिमसंस्कृतवार्ताः - रामटेकम्। कविकुलगुरु- कालिदास- संस्कृतविश्वविद्यालयस्य स्नातकोत्तरशिक्षाविभागस्य रामटेकस्य विश्वविद्यालय- सम्बद्धशिक्षकमहाविद्यालयस्य रामकृष्ण- शिक्षकमहाविद्यालयस्य च सहकारेण राष्ट्रियगोष्ठी आयोजिता। अस्यां विशेषतया विश्वविद्यालयस्य कुलपतिः प्रो. हरेरामः त्रिपाठी, शिक्षाविभागस्य अधिष्ठाता प्रो. ललिता जोशी, शिक्षा विभागाध्यक्ष डॉ. हृषिकेश दलाई, भारतीयदर्शनं, दर्शनं एवं संस्कृतिः संकायस्य, प्राचार्यः प्रो. कलापिनी अगस्ती सहैव रामकृष्णशिक्षक- महाविद्यालयस्य प्राचार्यः डॉ. कृष्णा माकोडे उपस्थिता आसन्। डॉ. हृषिकेश दलाई प्रास्ताविकं कृतवान्। राष्ट्रीयसंगोष्ठ्याः मुख्यव्याख्याता प्रो. कलापिनी अगस्ती इत्यनेन 'उच्चशिक्षायां भारतीयज्ञानव्यवस्थायाः महत्त्वम्' इति व्याख्याने एतत् प्रकाशितम्। कार्यक्रमाध्यक्षः कुलपति प्रो. हरेराम त्रिपाठी भारतीयज्ञानव्यवस्थानां जीवनस्य च सम्बन्धविषये छात्राणां मार्गदर्शनम् अकरोत्। अस्मिन् अवसरे के. वी. के. शिक्षकमहाविद्यालयस्य रामकृष्ण- शिक्षकमहाविद्यालयस्य च मध्ये शैक्षिकसमवायपत्रे हस्ताक्षरं कृतम्। बीबीए विभागाध्यक्षः प्रो. कीर्तिसदरः, बीसीए विभागाध्यक्ष डॉ. राजश्री, अमोल मांडेकरः, डॉ. सिद्धार्थः मंडलः, डॉ. शिउली चक्रवर्ती, डॉ. चंदनपालः छात्र-छात्राश्च अस्मिन्नवसरे उपस्थिताः अभवन्। कार्यक्रमस्य संचालनं डॉ. माधवीपाटिल अकरोत्। प्रो. शुभंगी मुन च धन्यवादज्ञापनं कृतवती।

## केन्द्रियसंस्कृतविश्वविद्यालयस्य आर्थिकानुदानेन गुजरातशैक्षणिकसंशोधनपरिषद् (GCERT) गान्धिनगरस्य सहकारेण श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सङ्कायविकासकार्यक्रमस्य (FDP) आयोजनम् अभवत्



हिमसंस्कृतवार्ताः- जगदीशडाभी (सोमनाथ- गुजरातम्) केन्द्रीय- संस्कृत- विश्वविद्यालयस्य आर्थिकानुदानेन गुजरात- शैक्षणिक- संशोधनपरिषद् (GCERT) गान्धिनगरस्य सहकारेण श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सङ्कायविकासकार्यक्रमस्य (FDP) ०२/१२/२०२४ तः ०६/१२/२०२४ दिनाङ्कं यावत् आयोजनम् कृतम्। श्रीसोमनाथ- संस्कृत- विश्वविद्यालयस्य माननीयानां कुलपतिवर्याणां प्रो. सुकान्तकुमारसेनापतिमहोदयानां प्रेरणया, माननीयानां कुलसचिवानां प्रो. ललितकुमारपटेलमहोदयानां निर्देशेन, केन्द्रियसंस्कृतविश्वविद्यालयस्य माननीयां कुलपतिवर्याणां प्रो. श्रीनिवासवरखेडीमहोदयानां मार्गदर्शनेन, डॉ. डी. एम. मोकरिया, डॉ. अमृतलालः भोगायता, डॉ. जीगरभाई भट्टवर्यानां च संयोजकत्वेन अयं कार्यक्रमः सम्पन्नः। अस्मिन् कार्यक्रमे विविधासु संस्थासु ४७ प्रतिभागिनः भागं गृहीतवन्तः। अस्मिन् कार्यक्रमे आदरणीयः श्रीमन् जनार्दन हेगडे महोदयः, माननीयः प्रो. शिवराम भट्ट महोदयः, माननीयः डॉ. नरेन्द्रकुमार पण्ड्या महोदयः, कविः माननीयः डॉ. अमृतलालः भोगायता महोदयः इत्यादयः विद्वांसः मार्गदर्शकव्याख्यानानि दत्तवन्तः।

## यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे

### (Sanskrit Version of Hindi song- जब वृन्दावन की कुञ्ज गली मे डोलना-")



M - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
F - मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
M - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
F - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
M - यदा वृन्दायाः कुञ्जसरण्यां रन्ता हे
जय वक्ता हे,राधे ! वक्ता हे
F - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
M - मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे--- (०१)
M - त्वं केकिमुकुटवनचारी
त्वं गोवर्धनगिरिधारी
त्वं केकिमुकुटवनचारी
त्वं गोवर्धनगिरिधारी
F - समकामविचित्रं ते ही
समलीला विचित्रा ते ही
M - गोपर्वतम् एकशयेनापि तोलयेत्
M - जय वक्ता हे,राधे ! वक्ता हे
M - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
F - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे - (०२)
समनेत्राणां त्वं तारा
नयनानन्दनकारा
या चरणे ते ही नन्ता
सा भवसिन्धोः हि तीर्णा
हो स्वर्गः,ते ही चरणयोः,ना ही त्यक्ता हे
M - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
F - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
M - यदा वृन्दायाः कुञ्जसरण्यां रन्ता हे
जय वक्ता हे,राधे ! वक्ता हे
M - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
F - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
MF - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे
MF - यदा वृन्दावनीये कुञ्जसरण्यां रन्ता हे
मनः श्रीकृष्ण त्वं श्रीकृष्ण ही मन्ता हे ---------- (०३)

रचयिता- डॉ. रुरुकुमारमहापात्रः (अध्यापकः)
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः


## क्रीड़ावार्ताः-हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धाओमानदेशस्य मस्कटेतिनगरे समारभते



हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा गतदिनारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते। अस्यां स्पर्धायां दशदलानि प्रातिभाग्यं कुर्वन्ति। स्पर्धेयम् अग्रिमवर्षे चिलीदेशे सम्भावितस्य एफ आई एच कनिष्ठ - विश्व-चषक स्पर्धायै पात्रता विधायिकेति अस्ति। प्रथम-ए वर्गे भारतीयदलस्य साम्मुख्यं कोरिया, जापान, चीन-ताइपे, हांगकांग, श्रीलंकेति देशैः सह भविष्यति।

# उत्तराखण्ड-संस्कृत-अकादम्याःअखिलभारतीयसंस्कृत-शोधसम्मेलनम्

## 'वर्तमाने भारतीयसंस्कृतज्ञानपरम्परायाः उपादेयता' विषयेस्मिन् विद्वद्भिः वाचितं शोधपत्रम्






हिमसंस्कृतवार्ता हरिद्वारं,कुलदीपमैन्दोला। उत्तराखण्ड-संस्कृत-अकादमीद्वारा भारतीयज्ञानपरम्परायाः संवर्धनाय 'वर्तमाने भारतीयसंस्कृतज्ञानपरम्परायाः उपादेयता' अस्य विषयस्य अन्तर्गतं द्विदिवसीयम् अखिलभारतीयं संस्कृतशोधसम्मेलनम् अकादम्याः संस्कृतभवने रानीपुरझाले ज्वालापुरहरिद्वारे आयोजितः ।कार्यक्रमस्य उद्घाटनं शनिवासरे, 07 दिसम्बर, प्रातः 10:30 वादने दीपप्रज्वलनेन सम्पन्नम्। उद्घाटनसमारोहे अध्यक्षारूपेण प्रो. हेमलता कृष्णामूर्तिमहाभागा, गुरुकुलकाङ्गडीविश्वविद्यालयस्य कुलपतिः, अद्यतनपरिप्रेक्ष्ये संस्कृतभाषायाः प्रासंगिकता प्रस्तुतवती। मुख्यातिथिरूपेण श्रीमान् दीपककुमारः, सचिवः संस्कृतशिक्षायाः, उत्तराखण्डशासनस्य, संस्कृतशिक्षायाः उन्नतिं च प्रचारं प्रति शासनस्य भूमिं विवृण्वानः। राष्ट्रपतिपुरस्कृतः विद्वान् डॉ. ओमप्रकाशभट्टः सारस्वतातिथिरूपेण संस्कृतशोधस्य नूतनदिशायः शोधार्थिनः प्रेरितवान्। विशिष्टातिथिरूपेण श्रीगिरीशकुमार-अवस्थी, उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलसचिवः, संस्कृतविश्वविद्यालयस्य योगदानं तथा अनुसन्धानकार्येषु नवाचारम् विज्ञापितवान्।अस्य सम्मेलनस्य मुख्योद्देशः संस्कृतभाषायाः प्रासंगिकताम् तथा भारतीयज्ञानपरम्परायाः वैज्ञानिकदृष्टिकोणे समकालीनसन्दर्भे प्रस्तोतुं भवति। विद्वांसः स्वीयैः शोधपत्रैः सिद्धं कर्तुम् प्रयत्नं कृतं यत् संस्कृतं केवलं प्राचीनभाषा न, अपितु , आयुर्वेदे, ज्योतिःशास्त्रे, दर्शने चादिषु वैज्ञानिकरूपेण समस्यानां समाधानं निहितमस्ति। विभिन्नविदुषाम् अध्यक्षतायां मञ्चसंयोजकानां च मञ्चसञ्चालकानां सानिध्ये द्विदिवसीयसम्मेलनस्य प्रथमे दिवसे विविधशोधसत्राणि आयोजितानि अभवन् । अस्मिन भारतीयसंस्कृतिः, योगः, वेदः, दर्शनम्, प्राचीनसाहित्यादीनां वैज्ञानिकपक्षः च विषयेषु विद्वांसः विचारान् प्रकटितवन्तः। सम्मेलनस्य सहभागित्वं देशस्य प्रमुखविश्वविद्यालयेभ्यः संस्थानेभ्यः च आगतानां शोधकर्तारः कृतवन्तः। सम्मेलनस्य अवसरे भाषकाः अत्र बलं दत्तवन्तः यत् संस्कृतभाषा केवलं धरोहरः न, अपितु ज्ञानस्य महान् स्रोतः अस्ति। आधुनिकविज्ञानं प्रौद्योगिकीं च व्यवस्थासु संस्कृतस्य उपयोगिताम् अवगन्तुं प्रचारयितुं च आवश्यकता अस्ति। सम्मेलनमिदं केवलं शोधकर्तृभ्यः विद्वद्भ्यः च प्रभावशाली अवसरं न दत्तवान्, अपितु संस्कृतभाषायाः उज्ज्वलभविष्याय अपि नवीनामाशां सृजितवान्। अस्मिन् अवसरे अकादम्याः सचिवः डॉ. वाजश्रवा आर्यः च संयोजकः डॉ. हरीशचन्द्रः गुरुरानी च सर्वान् अतिथीन् प्रतिभागिनः च आभारं प्रकटितवन्तौ। तौ अवदताम् यत् एवम्प्रकारस्य सम्मेलनानि संस्कृतभाषायाः भारतीयसंस्कृतेः च संरक्षणे संवर्धने च महत्वपूर्णभूमिकां वहन्ति।

# हिमाचलाय चत्वारः केन्द्रीयविद्यालयाः, सिराजस्य थुनागः, जसवां प्रागपुरस्य रीढ़ी कुठेड़ा, ऊनायां नन्दपुरे, अपरभञ्जाले च उद्घाटिताः भविष्यन्ति केन्द्रीयविद्यालयाः



हिमसस्कृतवार्ताः। केन्द्रस्य नरेन्द्रमोदीसर्वकारेण हिमाचलाय चत्वारः केन्द्रीयविद्यालयाः उपहाररूपेण प्रदत्ताः। एतेषु एकं विद्यालयं नेता प्रतिपक्षस्य जयरामठाकुरस्य निर्वाचनक्षेत्रे सेराजस्य थुनगक्षेत्रे उद्घाट्यते। हमीरपुरस्य सांसद अनुराग ठाकुरः विडियोसन्देशद्वारा केन्द्रसर्वकारस्य कृते आभारं प्रकटितवान्। विपक्षस्य नेता जयराम ठाकुरः अपि थुनागस्य केन्द्रीयविद्यालयं प्राप्य प्रसन्नतां प्रकटितवान् ।

अनुरागठाकुरस्य संसदीयक्षेत्रे त्रयः विद्यालयाः प्राप्ताः

अनुराग ठाकुरः अवदत् यत् हमीरपुरस्य संसदीयक्षेत्रस्य त्रयः विद्यालयाः प्राप्ताः। तेषु जसवान परागपुर विधानसभाक्षेत्रस्य अन्तर्गतं रिडी कुठेरा, ऊनायां नन्दपुरं, अपरभञ्जालं च समाविष्टौ स्तः । अनुरागठाकुरेण हिमाचलाय चत्वारः केन्द्रीयविद्यालयाः प्रदातुं प्रधानमन्त्रिणः नरेन्द्रमोदिनः केन्द्रीयशिक्षामन्त्रिण) धर्मेन्द्रप्रधानस्य च आभारं प्रकटितम्। तेन हिमाचलाय केन्द्रस्य अद्भुतं उपहारम् इति उक्तम्।

इदानीं विपक्षनेता जयरामठाकुरः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे मन्त्रिमण्डलसभायां हिमाचलस्य कृते चत्वारः केन्द्रीयविद्यालयाः दत्ताः सन्ति। देशे सर्वत्र ८६ केन्द्रीयविद्यालयाः उद्घाटिताः भविष्यन्ति। एतेषां विद्यालयानां निर्माणे ८२३२ कोटिरूप्यकाणां राशिः व्ययिता भविष्यति। एतेषां विद्यालयानां उद्घाटनेन बालकाः समीपे एव गुणवत्तापूर्णशिक्षां प्राप्तुं शक्नुवन्ति। आहत्य ८५ नवीनकेन्द्रीयविद्यालयाः उद्घाटिताः भविष्यन्ति, एकस्य उन्नयनं च भविष्यति।

२८ नवोदयविद्यालयाः अपि उद्घाटिताः भविष्यन्ति

एतदतिरिक्तं २८ नवोदयविद्यालयाः अपि उद्घाटिताः भविष्यन्ति । एतेषां विद्यालयानां कृते १३१६ पदानि निर्मीयन्ते। राजस्थाने नव केन्द्रीयविद्यालयाः उद्घाटिताः भविष्यन्ति, ओडिशा, आन्ध्रप्रदेशे च अष्ट-अष्टविद्यालयानाम् उपहारः प्राप्तः अस्ति। हिमाचलस्य थुनाग-नगरे विद्यालयस्य उद्घाटनेन समीपस्थेषु दर्जनशः ग्रामेषु बालकाः उत्तमशिक्षां प्राप्तुं शक्नुवन्ति। एतेषु सर्वेषु विद्यालयेषु देशस्य ८२५६० छात्राः शिक्षां प्राप्नुयुः।

## सशस्त्रसैन्यध्वज-दिवसस्य अवसरे भारतीयसशस्त्रसैन्यानां साहसं, शौर्यं, धैर्यं, त्यागं च नमस्कृतवान् रक्षामन्त्री राजनाथसिंहः



रक्षामन्त्रीराजनाथसिंहः सशस्त्रसैन्य ध्वजदिवसस्य अवसरे भारतीयसशस्त्रसैन्यानां साहसं, शौर्यं, धैर्यं, त्यागं च नमस्कृतवान्। श्रीसिंहः स्वीय सन्देशे उक्तवान् यत् सशस्त्रसेनायाः ध्वजदिवसः भारतीयसशस्त्रसैनिकानां साहसं योगदानं च स्मर्तुं दिवसः अस्ति । ऊनपञ्चाशदधिक नवदश-शततम वर्षात् राष्ट्रस्य वीरभटानां सम्माने सशस्त्रसैन्यध्वजदिवसः इति दिसम्बर् मासस्य सप्तमे दिनाङ्के आचर्यते ।

## कार्वेलं तु कटु एव भवति



*हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः*

महिलामित्रद्वयं परस्परं सम्भाषणं कुर्वतः।

प्रथमं महिलामित्रम्- प्रेमविवाहः सम्यक् अस्ति अथवा व्यवस्थापितः विवाहः?

द्वितीयं महिलामित्रम्- कार्वेलम् क्वाथयित्वा खादतु अथवा भर्जयित्वा, तस्य स्वादः तु कटुः एव तिष्ठति।

## देवसृष्टिः

देवेन मनुष्याः पशवश्च निर्मिता। तदनन्तरं देवेन दृष्टं यद मनुष्यानाम् अपेक्षया पशवः बहवः सन्ति। तर्हि तेन किंचित् परिवर्तनं कृतम्। कतिचन पशूनां परिवर्तनं मनुष्येषु कृता। एतेन कारणेन तेषां बाह्याकृति तु मनुष्यान् सादृश्यं दृश्यते किन्तु अन्तःकरणेन ते पशवः इव।

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**